दशमः पाठः

## शत्बुद्धि -सहस्रबुद्धि -कथा

कस्मिंश्चिद् जलाशये शत्बुद्धिः शत्बुद्धि -सहस्रबुद्धिश्चेति द्वौ मत्स्यौ निवसतः स्म .तयोः एकबुद्धिनामकेन मण्डूकेन मित्रताऽभवत .कदाचिज्जालहस्ताः धीवराः तं जलाशयमुपगताः .तेषु एको धीवरः अवदत् -एतस्मिन् जलाशये बहवो मत्स्याः सन्ति ,अतः तान् गृहीतुं श्वोऽत्र जालं क्षेप्स्यामः .तच्छ्रुत्वा मत्स्याः दुःखिनः अभवन् .तेषु मण्डूकः प्राह -भोः शत्बुद्धे! श्रुतं धीवरोक्तं भवता .ततः किं कर्तव्यं ?पलायनम् अवष्टम्भो वा .सहस्रबुद्धिः अवदत् -मित्र मा भैषीः .केवलं वचन श्रवणादेव न भेतव्यम्

सर्पाणां च खलानां च सर्वेषां दुष्टचेतसाम्

अभिप्राया न सिध्यन्ति तेनेदं वर्तते जगत्

शत्बुद्धिरपि अकथयत् साधु उक्तं त्वया .त्वं सहस्रबुद्धिः असि .तव सदृशी बुद्धिः कस्यापि नास्ति .वचनमात्रेण स्वजन्मस्थानं न त्याज्यम्

अहम् त्वां सु बुद्धि प्रभावेण रक्षयिष्यामि .मण्डूक आह -भोः !मम त्वेका एव बुद्धिः .अहं तु अत्र न स्थास्यामि .अन्यं जलाशयं गमिष्यामि .एवमुक्त्वा सः अन्य जलाशयं गतः ततः प्रभाते धीवरैः आगत्य जाल मध्ये मत्स्य -कूर्म -मण्डूक-कर्कटादयो निगृहीताः .शत्बुद्धिसहस्रबुद्धिमत्स्यौ अपि निगृहीतौ ,अपराह्णे सुखं गच्छसु धीवरेषु एकस्य शिरसि आरोपितं शत्बुद्धिम् अपरस्य हस्ते प्रलम्बमानं सहस्रबुद्धिम् चालोक्य मण्डूकः स्वपत्नीम् कथयत् -

शत्बुद्धिः शिरस्थोऽयं लम्बते च सहस्रधीः

एकबुद्धिरहं भद्रे ! क्रीड़ामि विमले जले

***पञ्च तंत्रः***

## शब्दार्थः

**मत्स्यौ** = दो मछलियाँ। **मण्डूकेन** = मेढक से। **जालहस्ताः धीवराः** = हाथ में जाल लिये हुए मछुआरे। **उपगताः** = पहँचे। **श्वः** = आने वाला कल। **क्षेप्स्यामः** = फेकेंगे। **पलायनम्** = भागना। **अवष्टम्भः** = रुकना। **माभैषीः** = मत डरो। **न भेतव्यम्** = नहीं डरना चाहिए। **दुष्टचेतसाम्** = दुष्ट हृदय वालों का। **स्थास्यामि** = रहूँगा। **कूर्म-मण्डूक-कर्कटादयः** = कछुआ, मेढक, केकड़े आदि।**निगृहीतौ** = (दोनों मछलियाँ) पकड़ ली गयीं। **प्रलम्बमानम्** = लटकते हुए। **सहस्रधीः** = हजार बुद्धि वाला। **शिरःस्थः**= सिर पर स्थित। **लम्बते** = लटक रहा है।

## अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत -**

कस्मिंश्चिद् मत्स्यौ कदाचिज्जालहस्ताः तच्छ्रुत्वा अवष्टम्भः श्वोऽत्र

**2. एकपदेन उत्तरत -**

(क) शतबुद्धिः सहस्रबुद्धिश्च कुत्र निवसतः स्म ?

(ख) जालहस्ताः धीवराः कम् उपगताः ?

(ग) कस्य एका बुद्धिरासीत् ?

(घ) जलाशये बहवः के सन्ति ?

**3. कः उक्तवान् इति लिखत-(मण्डूकः/शतबुद्धिः/सहस्रबुद्धिः/धीवरः)**

(क) एतस्मिन् जलाशये बहवः मत्स्याः सन्ति। ........................... (ख) केवलं वचनश्रवणादेव न भेतव्यम्। ...........................

(ग) त्वं सहस्रबुद्धिः असि। ..........................

(घ) भोः! मम तु एका एव बुद्धिः। ..........................

**4.मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत-**

**क्षेप्स्यामः नास्ति रक्षयिष्यामि निवसतःस्म अवदत्**

(क) द्वौ मत्स्यौ ........................

(ख) एको धीवरः ........................

(ग) श्वोऽत्र जालं ........................

(घ) तव सदृशी बुद्धिः कस्यापि ........................

(ङ) अहं त्वां सुबुद्धिप्रभावेण ........................

**5. हिन्दीभाषायाम् अनुवादं कुरुत -**

(क) तच्छ्रुत्वा मत्स्याः दुःखिनोऽभवन्।

(ख) अहं त्वां सुबुद्धिप्रभावेण रक्षयिष्यामि।

(ग) अहं तु अत्र न स्थास्यामि।

(घ) मण्डूकः स्वपत्नीम् अकथयत्।

**6. समासविग्रहं कृत्वा समासस्य नाम लिखत -**

सामासिकपदम् समासविग्रहः समास-नाम

जलाशयः = जलस्य आशयः तत्पुरुषः।

जालमध्ये = ...........   ..........।

स्वपत्नीम् = .......  ........

जन्मस्थानम् = ............ .........

मत्स्यकूर्ममण्डूकाः = ......... ........।

**7. निम्नलिखित-पदानां विभक्ति  वचनं च लिखत -**

*पदम्   विभक्तिः   वचनम्*

भवता = तृतीया      एकवचनम्।

त्वया = ......, .......

तान् = ........,  ........

धीवराः = .........., ...........

सर्पाणाम् = .........., ........

**शिक्षण-सङ्केतः**

*प्रस्तुतकथां संक्षेपेण छात्रैः स्वशब्देषु लेखयत।*

**एतदपि जानीत-**

## वाहनों का संस्कृत में नाम-

**सवारी  यानम्**

**<u>गाड़ी</u>** शकटः, शकटी

***<u>साइकिल</u>*** द्विचक्रिका

***<u>बैलगाड़ी</u>*** गन्त्री

***<u>हवाई जहाज</u>*** वायुयानम्/विमानम्

***<u>जहाज</u>*** **पोतः**, जलयानम्